॥ श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः ॥ श्रीरामचंद्राय नमः ॥ नित्यं निरंतरानंदं चिद्घनं ब्रह्म निर्भरं ॥ भूसातदरीनुभाति स्याम हमस्य ह्रदयं सदा ॥१॥ अंबागृहीतवामार्द्धं वंदे चंद्रकलाधरं ॥ लावण्यमधुराकारं कारुण्यरसवारिधिं ॥२॥ कैवल्यानंदयोगींद्रपादपंकजरजोरविः ॥ राजते मे हृदयाकाशे मोहध्वांतनिवर्त्तकः ॥३॥ गुरुज्ञानेंदपदांभोजद्वंद्वं सेवे यदुद्भवं ॥ निर्वाणरसमास्वाद्य तृष्णाः शाम्यन्ति पंकयः ॥४॥ सच्चिदानंदयोगींद्रान् प्रणते भुवि रेचन ॥ यत्कृपावल्लवसंतीर्णो मया संसारवारिधिः ॥५॥ इह खलु लक्ष्मीधरो नाम कश्चित् सुकृती निरंतरनित्यानित्यवस्तुविवेकजन्मश्रुतस्तोत तया संजातविवेकवैराग्यशमदमादिमुमुक्षुत्वतः आत्मविविदिषितया संतत्कलोकवेदधर्मान् गुरुवरचरणोपसर्पणपुरःसरं श्रवणपूर्वकं संप्य कृत्स्नवेदांततत्त्वेपि असंभावनया प्रतिबंधतानतया परितुष्यतः कांश्चित् पुरुषधौरेयान् उपलभ्य संजातकरुणस्तेषां करतलबिल्वफलवत् स्फुटं वेदांतप्रतिपाद्यं ब्रह्म सच्चिदानंदलक्षणं सर्वज्ञं सर्वोपादानं नित्यं सर्वगमद्वयं देहेंद्रियप्राणमनोबुद्ध्यहंकारसाक्षि प्रत्यगभिन्नतया तद्वैः संभावायितुं किंचित् प्रकरणं अद्वैतमकरंदाख्यमारभमाणः शिष्टाचारपरिप्राप्तं इष्टदेवतापरिस

Accession No:- ~~206~~ M862
Title :- अद्वैतमकरन्द टि / रससाभिव्यक्तिका
सव्याख्या
Subject:- वेदान्त
Author:- लक्ष्मीधर टी - स्वयंप्रकाश.
पत्रे :- 43

(1)

मानसयेष्टदेवताप्रणामरूपं मंगलं स्वयमनुष्ठाय शिष्यशिक्षायै ग्रंथतो निबध्नाति ॥ ॥ कृपाक्षकिर
णाद्योतनमन्मोहाब्धये नमः ॥ अनंतानंदरूपाय जगन्मंगलमूर्तये ॥१॥ कृपाक्षः भक्तेषु तिर्यक्पाति
तारूपा दृष्टिः तस्याः किरणेन प्रभया आद्योतः शोषितो नमतां नमस्कर्तॄणां मोहोऽज्ञानं स एवाब्धिः स
मुद्रो येन सः तथा तस्मै श्रीगुरुपरमेश्वरप्रसादरहितानां दुस्तरत्वात् भ्रांतिपरंपरातरंगपुंजत्वा
द्रागादिमहाग्राहादियोगाच्चायुक्तमज्ञानस्य समुद्रत्वं । अनंतानंदरूपाय अनंतो देशकालवस्तुपरि
च्छेदशून्यः आनंदः स्वरूपं यस्य सः अनंतानंदः सच्चासौ अनंतानंदरूपः वसुदेवकुमारः त
स्मै जगन्मंगलमूर्तये जगतां लोकानां मंगलभूता सुखाभिवृद्धिकरी मूर्तिर्विग्रहो यस्य स जगन्मंग
लमूर्तिस्तस्मै नमोऽस्तु जगन्मंगलमूर्तये इत्यनेन स्मृतिमात्रेण तस्यैहिकामुष्मिकपुरुषार्थपरि
पंथिविघ्ननिरासे सामर्थ्यमुक्तं मंगलस्य तादृशत्वात् ॥१॥ एवमनुष्ठितस्येष्टदेवतानमस्कारलक्ष
णमंगलनिर्बाहितसकलांतरायः प्रथमं तत्त्वमस्यादिमहावाक्ये [illegible]पदार्थयुक्तं बोधितं प्रसंगा
त्मनो ब्रह्मत्वं दुःखमालंभावयन्नाह ॥ अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ॥ ब्रह्मैवाह

साधिनातस्य पूर्वमेव साधितत्वात्।। ननु अनुमानस्य नाहमीश्वर इति प्रत्यक्षविरोध
इति चेन्न। तावदात्मनोऽप्रसत्त्वे बाह्यप्रत्यक्षाविरोधः।। आत्मनि रूपाद्यभावेन बाह्यस्य त
त्राप्रवृत्तेः।। नापि मानसप्रत्यक्षविरोधः।। मनसो मनःसाक्षिण्यात्मनि प्रवृत्तेरसंभवा
त्।। ननु जीवेश्वरौ भिन्नौ किंचिज्ज्ञत्वसर्वज्ञत्वविरुद्धधर्माधारत्वात्। दहनहिम
वदित्याद्यनुमानविरोध इति चेन्न विरुद्धधर्मवतो बिंबप्रतिबिंबयोःऽअमंदशब्दाधा
रे आकाशे च व्यभिचारात्।। ननु द्वासुपर्णेत्यादिश्रुतिविरोध इति चेन्न।। तस्या अ
नसरत्वेन तत्त्वमस्यादिश्रुत्याबाध्यमानत्वात् तस्मान्नाहमीश्वर बुद्धिर्देहाद्युपाधि
निमित्ता भ्रांतिः।। न तु शुद्धजीवस्वरूपविषया।। तदुक्तं। त्वयि मयि चगण्यमा[illegible]नेम

शक्नोम्यशक्तोहमेव देहद्रष्टा ॥ विश्वापि चैकेऽशैते मेसङ्गो ध्यानंदपूर्णतातुल्ये ति ॥ अतो हं ब्र
ह्मैवेतिभावः ॥२॥ ननु यः सर्वज्ञः स सर्ववित् इत्यादिश्रुत्या हि ब्रह्म सर्वज्ञतया गम्यते यतो
वा इमानि भूतानि जायन्ते इत्यादिश्रुत्या च सर्वजगत्कारणतया च । प्रत्यगात्मा तु स्वशरीरादि
कमपि साकल्येन न जानाति स्वातन्त्र्येण किंचित्कर्तुमपि न शक्नोति तत्कथमस्य सर्वज्ञेन
सर्वकारणेन ब्रह्मणा अभेद इत्याशंक्य प्रत्यगात्मनोपि तद्वयमुपपादयति ॥ ॥ मय्येवो
देति चिद्व्योम्नि जगदिदं सर्वं पत्तनं ॥ अतोहं न कथं ब्रह्म सर्वज्ञं सर्वकारणं ॥३॥ चिद्व्योम्नि चिदाका
शे मयि प्रत्यगात्मन्येव जगदिदं सर्वं पत्तनं ऐंद्रजालिकविरचितं मायया आवरणविक्षेपरूपया च म
य्येव प्रतीयमानं नगरं गंधर्वपत्तनं नाम तादृशमिदं जगदुदेति उत्पद्यत इत्यर्थः ।
अयं भावः । मिथ्यापदार्थस्य हि द्रष्टैवोपादानं । यथा स्वप्नप्रपंचस्य तत्साक्षी । तथा जाग्रत्प्रपंचस्या

त्त

यतः सिद्धं सच्चिदानंदलक्षणं ॥२॥ अहमहं शरीरादिसाक्ष्यस्मि सद्रूपो भवामि ॥ आत्मनि
अध्यस्तात् शरीरादेः सत्ताप्रदत्वात् सदा अवस्थात्रयेपि भामि ॥ जाग्रति देहेंद्रियसाक्षितया ।
स्वप्ने अंतःकरणवासनादिप्रपंचसाक्षितया । सुषुप्तावज्ञानसाक्षितया च प्रकाशे । कदापि
न कदाचिदपि दुःखाद्यनुभवकालेपि अहं नाप्रियो भवामि नानिष्टो भवामि किंतु सदा
प्रिय एव भवामि ॥ दुःखादौ द्वेषस्यात्मस्नेहनिमित्तत्वाद्दृष्टं दुःखादौ द्वेषदर्शनात् ॥ तथा च
सति परमप्रीतिविषयत्वात् आनंदरूपः । यस्मात् कालत्रयेपि अबाध्यमानत्वात् स
द्रूपः प्रकाशमानत्वात् चिद्रूपः परमप्रीतिविषयत्वात् आनंदरूपश्च तस्मादहं सच्चि
दानंदलक्षणं सच्चिदानंदरूपं ब्रह्मेति सिद्धं । अत्रेदमनुमानं विवक्षितं । प्रत्यगात्मा ब्र
ह्मणो न भिद्यते सच्चिदानंदरूपत्वात् ब्रह्मवदिति । न च हेतुरसिद्धः अहमस्मी

पि सर्वस्य दृश्यत्वेन मिथ्यात्वात्तद्द्रष्टा प्रत्यगात्मैवोपादानं वक्तव्यं। तदुक्तं॥ यथा स्वप्नप्रपंचोयं मयि मायाविजृं
भितः॥ एवं जाग्रत्प्रपंचश्च मयि मायाविजृंभितः॥ एवं च प्रत्यगात्मनस्तद्द्रष्टृत्वलक्षणं सर्वज्ञत्वं तदधिष्ठानत्व
ण३ लक्षणं सर्वकारणत्वं च सिध्यति। ननु बहुदूरव्यवहितदेशवर्तिमेर्वादीनामदृश्यमानानां कथं प्रत्यगात्मा द्रष्टा
कथं तदुपादानमिति चेच्छृणुत र्हि रहस्यं॥ एतावंतं कालं मेर्वादिकमहं नाज्ञासिषमिति स्वज्ञानविशेषणत
यामेर्वादिकं स्मर्यते तत्स्मरणं मेर्वाद्यनुभवं विनानुपपद्यमानं सन्मेर्वाद्यनुभवं कल्पयति॥ तत्र चेदि
यादीनामप्रवृत्तेः प्रत्यगात्मचैतन्येध्यस्ततयैव मेर्वाद्यनुभवो वक्तव्यः॥ अध्यस्तस्य चाधिष्ठानमेवोपाद
नं तज्ज्ञानादेव भानं च भवति॥ तथा च। प्रत्यगात्मा स्वाध्यस्तमेर्वादेरप्यज्ञाततया साक्षी॥ तदुपादानं च भवति॥
तदुक्तं ब्रह्मगीतायां॥ ज्ञातरूपेण चाज्ञातस्वरूपेण च साक्षिणा॥ सर्वं प्रातीतदाभाति ततस्तद्धापि सर्वदेति॥
तथा च प्रत्यगात्मा सर्वज्ञः सर्वकारणं चेति॥ यदुक्तप्रकारेण सर्वज्ञः सर्वकारणं चाहमतः कथं तद्रूपं ब्रह्म न
त्वामभिभवाम्येवेत्यर्थः॥ ३२॥ ननु नित्यं विभुं सर्वगतं सुसूक्ष्ममित्याद्युपनिषत्सु नित्यं ब्रह्म श्रूयते॥ आत्मा च
मरणादिधर्मकत्वादनित्य एवानुभूयते॥ तत्तश्च न तयोरैक्यमित्याशंक्य किमात्मनो बोधपदं वस्तुत एव नाशं
ब्रवीषि उत देहसंयोगाद्युदृष्ट्येवान्यसंबंधादात्मनो नाशं ब्रवीषि अथवा परानाशात्प्रत्यगतरूपादिवदा

क्ष

अथ नाशानाशौ श्रवीषि विकल्प्याद्यं प्रत्याह॥ ॥स्वतः प्रत्यभिज्ञानान्निरंशत्वान्न चान्यतः॥ न चाश्रयविनाशान्मे
विनाशः स्यादनाश्रयात्॥४॥ मे प्रत्यगात्मनो मम न स्वतो नाशो भवति॥ तत्र हेतुः प्रत्यभिज्ञानादात्मनः प्रत्यभि
ज्ञायमानत्वात् प्रत्यभिज्ञानं नाम य एवमनुभूतस्तस्य कालान्तरे प्रमाणेन तदुल्लेखपूर्वकं ज्ञानं आत्मा हि योऽहं बाल्ये
पितरावन्वभुवं॥ स एवेदानीं स्थविरे प्रनप्तॄननुभवामि योऽहं सुप्तः स्वप्नमद्राक्षं स एवेदानीं जागर्मीति च बा
ल्याद्यवस्थासु जाग्रदाद्यवस्थासु च प्रत्यभिज्ञायते न चैवं प्रत्यभिज्ञानं आत्मनो निर्भिन्ननाशे नोपपद्यते॥ तथा
हि॥ आत्मनो हि स्वतो नाशे प्रतिक्षणमन्योन्य आत्मेति वक्तव्यं तत्र कथं वान्योन्येन सोऽहमिति प्रत्यभिज्ञायेत॥
आत्मा सोऽहमित्यात्मानं प्रत्यभिजानाति तस्मात् न तस्य स्वतो नाश इत्यर्थः॥ न द्वितीय इत्याह॥ निरंशत्वान्न चान्य
इति॥ निरंशत्वादंशरहितत्वान्निरवयवत्वादन्यतो हेतुसंयोगादस्यात्मनो न नाश इत्यर्थः॥ आत्मा हि चिद्रूपत्वान्नि
रवयवः॥ यदि निरवयवस्यात्मनोऽसावयवत्वमुच्यते॥ तर्हि विकल्प्यं॥ आत्मावयवाश्चेतना अचेतना वा॥ नाद्यः॥ आत्मा
वयवानां हि प्रत्येकं चेतनत्वे विरुद्धाभिप्रायतया शरीरमुन्मथ्येत॥ न द्वितीयः॥ अचेतनैरवयवैरारब्धस्यात्म
नोऽप्यचेतनत्वप्रसंगत्वात्॥ न ह्यचेतनैस्तन्तुभिरारब्धः पटश्चेतनो दृश्यते ततो निरवयव एवात्मा॥ न निर
वयवे चात्मनि हेतुसंयोगः संभवति तस्यैकदेशित्वात् ततोऽन्यतोऽप्यात्मनो न नाश इति भावः॥ नापि तृती
य इत्याह॥ न चाश्रय इत्यादिना॥ आश्रयनाशादाधारनाशादपि मे मम विनाशो न स्यात् कुतः अनाश्रयात्

नि

न

२ = जीवस्यापुनरुत्पत्तिप्रलयौ जातो देवदत्तो मृतो देवदत्त इत्येवं जातीयकान् लौकिकान् व्यपदेशान् जातकर्मादिसंस्कारविधानानि च ... जीवस्योत्पत्तिप्रलयौ

आश्रयस्याधारस्याभावादासाहित्यगुणक्रियाजातिसाधर्म्यतमत्वाभावादनाश्रयः निरवयवत्वाच्च नापि घटवत्साश्र-
यः ॥ अतः आश्रयनाशादप्यात्मनो नाशः ॥ आत्मनो मरणादिप्रतीतिस्तु देहाद्युपाधिकृता ॥ तदुक्तं ॥ चराचर-
व्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वादिति ॥ अस्यार्थो विद्यारण्यगुरुभिरधिकरणरत्नमाला-
यां दर्शितः ॥ जीवस्य जन्ममरणे वपुषो नात्मनो हि ते ॥ जातो मे पुत्र इत्युक्ते जातकर्मादिभिस्तथेति ॥ एवं पूर्वपक्षे
प्राप्ते सिद्धांतमाह ॥ मुख्ये ते वपुषो भाक्ते जीवस्यैते अवेक्ष्य हि ॥ जातकर्म चौलौ कौ किंजीवापेतेति शास्त्रतः इ-
ति ॥ तत्त्रिविधनाशाभावान्नित्य एवात्मेति तस्य ब्रह्मणा भेदः सम्यक् घटत इति भावः ॥ ४ ॥ हेतुसंयोगादा-
त्मनो नैनं शस्त्राणीति द्वितीयं पक्षं प्रपंचयति ॥ न शोषक्लोषविक्लेदच्छेदाश्चित्त्वं भसो मम ॥ ससेरप्यनिलाग्न्यंभः
शस्त्रैः किमुत कल्पितैः ॥ ५ ॥ चित्त्वं भसश्चिदाकाशस्य चात्मनः अनिलेन वायुना न शोषः शोषणं तत्पुष्प-
फलादेरिव .... न भवति ॥ नाप्यग्निना प्लोषो दाहः पटादेरिव भवति ॥ नाप्यंभसा जलेन मस्यादेरिव क्लेदः क्लेदनं
भवति ॥ नापि शस्त्रेणायुधेन इक्षुदंडादेरिव छेदो द्वैधीभावो आत्मनो भवति ॥ आकाशस्येवात्मनो निरवयव-
त्वेन वाय्वादिभिः संबंधाभावादित्यर्थः ॥ व्यवहारिकसत्त्वाकाशस्यापि निरवयवत्वेनासंगत्वादाकाशतुल्ये
ससेरप्यनिलादिभिः शोषादयो न संभवंति ॥ आत्मनि मायाकल्पितमिथ्याभूतैर्वाय्वादिभिर्वस्तुतः अद्विती-

ना

परम ते

॥५॥ यस्यासंगस्यात्मनः शोषादयो न संभवंतीति विमुक्तव्यमित्यर्थः॥ तदुक्तं भगवता॥ अछेद्योयमित्यादिना॥
ननु प्रसंगात्सापरिछिन्न एवानुभूयते अहमिहास्मीति प्रतीतेः॥ ब्रह्म च सर्वगतं नित्यं विभुं इत्यादि श्रुतेः॥
अतो नायं ब्रह्मेत्याशंक्यात्मनः सर्वगतत्वं युक्त्या संभावयन्नाह॥ अभारूपस्य विश्वस्यभानं भासन्नि-
धेर्विना॥ कदाचिन्नावकल्प्येत नो चाहं तेन सर्वगः॥६॥ अभारूपस्याचिद्रूपस्य जडस्येत्यर्थः॥ विश्वस्य
जगतो भानं प्रकाशः भासन्निधेर्विना भासंनिधिं विनेत्यर्थः कदाचित्कदाचिदपि नावकल्प्येत न संभवेत्॥ भो चाहं चै-
तन्यरूपस्त्वाहं प्रसंगात्तातेन जडसर्वप्रपंचभासकत्वेन प्रसंगात्सा सर्वगः सर्वगतो भवामीत्यर्थः॥ बहुयोजनवर्ति
चंद्रसूर्यमंडलं तत्तोप्यतिदूरवर्ति ध्रुवादि नक्षत्राणि च प्रसंगात्तन्नो भासंते तत्रभानं जडा [illegible] वतो न संभव-
व प्रकाशदर्शनात्॥ यदि प्रसंगात्सात्रैव तिष्ठे कथं ध्रुवादिनासंबध्येत ततो ध्रुवादिप्रासकत्वात्प्रसंगात्सा
सर्वगतः॥ परिछिन्नतापतीतिस्त्वात्मनो भिव्यंजकोपाधिपरिछेदात्सा उपपद्यते॥ तदुक्तं ब्र
ह्मगीतायां॥ ॥स्वयं भातुमशक्तं हि जडात्मकमिदं जगत्॥ चित्संबंधबलेनैव खलु भाति न चान्यथा॥
स्वाभिव्यंजकसंकोचात्संकोचः प्रतिभासनः॥ न स्वरूपे ण चिद्रूपः सर्वव्या ॥शिव॥

पीसदा खल्विति ॥ ततो जीवात्मा ब्रह्मैवेति भावः ॥५८॥ ननु जीवस्य ब्रह्माभेदोऽसंगतः ब्रह्मण एवासिद्धेः ॥ देशका
लवस्तुपरिच्छेदशून्यं वस्तु हि ब्रह्मेत्युच्यते ॥ न च तत्संभवति ॥ कालाकाशादेर्द्वितीयस्य विद्यमानत्वेन
वस्तुपरिच्छेदाभावस्यासिद्धेः ॥ न च आकाशादेर्ब्रह्मण्यारोपितत्वेन मिथ्यात्वात् ॥ तेन तस्य न द्वितीयत्वमि
ति वाच्यं ॥ आकाशादेरध्यस्तत्वे मानाभावात् ॥ न चास्ति आकाशः संभूत इति श्रुतिस्तत्र मानमिति वाच्यं ॥
तत्राकाशादेर्ब्रह्मकार्यतामात्रप्रतीतेरित्याशंक्य ब्रह्मणो अद्वितीयत्वसिद्धये आकाशादेरध्यस्तत्वं साधयति ॥
न हि भानात् ऋते सत्त्वं न हि भानं चितो चितः ॥ चित्संभेदोपि नाध्यासादृते तेनाद्वयः ॥७॥ भानादृते प्रका
शं विना पदार्थस्य सत्त्वं सद्भावो नास्ति ॥ अप्रकाशे नरशृंगविषाणादेः सत्त्वादर्शनादित्यर्थः ॥ ततः किं तत्रा
ह ॥ न हि इत्यादिना अचितोऽजडस्य चितश्चेतनत्वेन अन्यस्य संबंधं विना भानं प्रकाशो नास्ति स्वतो भानं न हि
जडत्वाभावप्रसंगादित्यर्थः ॥ ततोपि किं तत्राह ॥ चित्संभेदोपीत्यादिना ॥ चित्संभेदोपि चेतनस्य संबंधो
ऽप्यध्यासादृते चित्यारोपितत्वं विना जडस्य न संभवतीत्यर्थः ॥ अयं भावः ॥ चिज्जडयोराध्यासिकसं
बंधातिरिक्तसंबंधं वदन्वादी प्रष्टव्यः ॥ किं तयोः संबंधः संयोगः उत समवायः अथ तादात्म्यं ॥ अथ
ता २

५भा

२ग

विषय

१ चितो निर्गुणत्वात्

वौ विषयीभाव इति ॥ नाद्य ॥ चितः अद्रव्यत्वेन संयोगानुपपत्तेः ॥ गुणाश्रयस्यैव द्रव्यत्वात् ॥ नापि समवायः
चिज्जडयोर्गुणगण्यादिष्वन्यतमत्वाभावात् ॥ ननु चिज्जडयोः कार्यकारणभावात् तंतुपटयोरिव
समवायोस्त्वीति चेन्न ॥ तंतुपटयोः समवायेऽवयवावयविताया एव प्रयोजकत्वेन कार्यकारणभा
वस्य अप्रयोजकत्वात् ॥ अन्यथा तुरीपटयोरपि समवायप्रसंगात् ॥ अवयवावयवितायाश्च दृग्दृ
श्ययोरभावात् ॥ नापि द्वितीयः ॥ परस्परविलक्षणयोस्तादात्म्यासंभवात् ॥ नापि विषयविषयीभा
वः ॥ तस्य [illegible] मूलसंबंधपूर्वकत्वात् ॥ तदसंभवस्य चोक्तत्वात् ॥ अन्यथाऽतिप्रसंगात् ॥
तदुक्तं सर्वज्ञात्ममुनिभिः ॥ न संकरेणापि च संयुक्तिस्तयोर्न चास्ति तद्वत्समवायसंभवः ॥ ततो न
चिज्जडे ससंबंधेयं प्रतिपद्यते का च न मूलसंगतिरिति ॥ ततस्तयोराध्यासिक एव संबंध इति
वाच्यं ॥ तथा च जडपदार्थभानान्यथाऽनुपपत्तिरेवाकाशादेरध्यस्तत्वे प्रमाणं तदपि तैरेवोक्तं ॥
ततो विषयमुख्यमदोऽजगज्जडं चिदात्मनोऽस्यैव विवर्त इष्यतां ॥ अनाद्यविद्यापरसंवृतोऽस्य नुस्त
तोपलभ्यत्वममुष्य कल्प्यत इति ॥ तेन आकाशादेरध्यस्तत्वे नाहंप्रत्ययगम्यं परमात्मसाध्यः ॥ अद्वितीय
इत्यर्थः ॥ तेन च ब्रह्मणो वस्तुपरिच्छेदाभावेन त्रिविधपरिच्छेदशून्यत्वेन लक्षणं ब्रह्मणः सिद्धमित्यर्थः ॥ तदुक्तं

दाक्रीडत्वा ४

विद्यारण्यगुरुभिः पंचकोशविवेके देशकालादिवस्तूनां कल्पितत्वाच्च मायया॥ न देशादिरूलोंतोस्मिन्
मात्रं यत्स्फुरति तत्॥१७॥ न तु स्थूलोऽहं कृशोऽहं काणोऽहं बधिरोऽहं मूकोऽहं बुभुक्षितोऽहं पिपासितोऽहं मंदोऽहं नि
श्चितोऽहमिति देहादिरूपेण नुभूयमानस्य प्रतीचः॥ कथंचिदेकरूपस्य सतो मतेयाशंक्य देहादीनामनात्मत्वं प्र
त्येकं साधयति॥ न देहो नेंद्रियं चाहं न प्राणो न मनो न धीः॥ ममतापरिलब्धत्वादिदं धियः॥१८॥ देहः स्थूल
स्थूलः पिंडः॥ इंद्रियं पंचविधं ज्ञानधीसानं चक्षुरादि॥ कर्मसाधनं पाण्यादि च प्राणः पंचवृत्तिः॥ मनः संशया
त्मकं॥ बु[illegible]द्धिर्निश्चयात्मिका॥ अहं शब्दस्य देहादिभिः प्रत्येकं संबंधः वै॥ एते देहादयः बुद्धिपर्यंताः पंचापि
पदार्थाः॥ अनात्मान इत्यर्थः॥ कुत इत्यत आह॥ मम [illegible]तेषां दिनो ममतापरिलब्धत्वादि[illegible] दंधियः आक्रीडत्वा
ति च्च ममता मम तैर्बुध्या परिलब्धत्वादोलिंगितत्वाद्विषयीकृतत्वादिति यावत् इ[illegible]दं धियं इदं बुद्धेराक्रीडत्वा
त्लीलास्थानत्वादिदं बुद्धिविषयत्वादित्यर्थः॥ अत्रेदमनुमानं विवक्षितं देहादयः प्रत्येकमनात्मानः ममता
बुद्धिविषयत्वादिदं बुद्धिविषयत्वाञ्च घटादिवदिति॥ देहः अनात्मा[illegible] रूपादिमत्वात् घटवत्॥ इंद्रिया
णि अनात्मानः करणत्वात् कुठारवत्॥ प्राणः अनात्मा वायुत्वात् बाह्यवायुवत् देहो[illegible]मि साक्षिप्रतीतिसभावा
च्च अनात्मत्वं पंचानां॥ दृश्यो कृमिसादिप्रतीतिस्तु रक्तस्फटिकवत् यादिप्रतीतिवदोसमि देहादिधर्मा
सा ध्यासादुपपद्यते॥ नापि तत्संघातस्यात्म[illegible]त्वं अनात्मसमुदायस्यास्तेघातोनात्मा अनात्मत्वात् [illegible]

पि॰२

दिवदिति भावः॥८॥ ननु अहंकारस्यात्मत्वमस्तु तस्य ममेदंबुद्धिविषयताभावादित्याशंक्य ॥ सुषुप्त्यादावा
त्मसन्निधानेपि अहंकारस्याभावात् न तयोरैक्यमित्याशयेन प्रकारांतरेण तयो[र्]भेदं साधयति॥ साक्षी सर्वान्वि
तः प्रेयानहं नाहं कदाचन परिणामपरिच्छेदपरितापरूपत्वात्॥९॥ साक्षी चिद्रूपः अंतःकरणपरिणामरागद्वेषादिद्रष्टा सर्वा
न्वितः सर्वत्र घटपटादिष्वन्वितः घटः स्फुरति पटः स्फुरतीति स्फुरणस्य सर्वत्रानुगतत्वेनानुभवात्॥ प्रेयान्प्रियतमः आनंदरूपः
तस्यैव मे यस्मादनुभूयते हि आत्मनः प्रियतमत्वं अहं सर्वदा भूयासं न कदाचिन्मा न भूवमित्यात्मनि सर्वेषां प्रार्थनादर्शनात्
इत्यर्थः॥ एवंभूतोऽहं प्रत्यगात्मा कदाचन कदाचिदपि नाहं नाहंकारो भवामीत्यर्थः॥ अत्र हेतुमाह॥ परिणामेत्यादिना॥ अहं
कारस्य परिणामपरिच्छेदपरितापैः परिणामो रागद्वेषादिः परिच्छेदः परिमितत्वं परितापो दुःखादिः एतैस्त्रिभिरूपत्वात्स्वरूपत्वात् सं
धस्तस्मादित्यर्थः॥ द्रष्टुर्द्रश्यभावेन सर्वगतत्वपरिच्छिन्नत्वाकारेण आनंदरूपत्वदुःखित्वाकारेण चानुभूयमानत्वा
दहंकारात्मनोर्भेदः स्फुट इत्यर्थः॥ किमिति तर्हि तयोर्भेदः सर्वैर्नानुभूयत इति चेदहंकारात्मनोस्तप्तायःपिंडवदविवेके न तद्
दमेकतयाध्यासान्नानुभूयत इति गृहाणेत्यभिप्रायः॥९॥ नन्वेवमपि संसारिण आत्मनः कथं नित्यमुक्तत्वं अप्रमितानुभवसं
साहंकारस्यैवनात्मन इति वाच्यं॥ आत्मनोहंकारोभयसंनिधाने प्रतीयमानस्य संसारस्याहंकारे कैसंबाधित्वेमा
नाभावादित्याशंक्यो न्वयव्यतिरेकावेव तत्र प्रमाणमित्याह॥ सुप्तेहमिन्न दृश्यते दुःखदोषाप्रवृत्तयः॥
अतस्तस्यैव संसारोनमे संसत्तं साक्षिणः॥१०॥ अहमि अहंकारे सुप्तेऽनुपरतेसति सुप्ति
मूर्छादौ दुःखदोषप्रवृत्तयः दुःखं च दोषाः रागादयश्च त

पृ
७ द्वम

कार्यभूताः प्रवृत्तिश्च दुःखदोषप्रवृत्तयः ताः न दृश्यंते यतः अतस्तस्यैवाहंकारस्य संसारः संसर्त्तृ साक्षि-
णः संसर्तुरहंकारस्य साक्षिणः मे मम प्रत्यगात्मनो न संसार इत्यर्थः। अहंकारे सति जाग्रत्स्व-
प्नयोः संसारदर्शनात् तदभावे च सुषुप्त्यादौ केवले आत्मनि संसारादर्शनात्। अहंकारसं-
बंध्येव सन् संसार आत्मनि अपि तदविवेकात्प्रतीयते। यथा दाहकत्वमग्निसंबंध्येव सन्
तदविवेकादयस्यपि प्रतीयते यथा वा रक्तिमा जपाकुसुमसंबंध्येव सन् अविवेकात्स्फटिके प्र-
तीयते तद्वदात्मन्यपि अहंकारोपाधिवशादेव संसारः प्रतीयते न स्वतः सुषुप्त्यादावदर्शनात्॥
तदुक्तं सर्वज्ञात्ममुनिभिः कर्त्रादिसन्निधिबलेन तथापि कर्तृभोक्तृप्रमातृवपुरापतितं क्रमेण॥
तत्त्वबुद्धिसंश्रयमनात्मगतं प्रतीचि शुद्धेपि पश्यसि तमःपटलात्कृतात्मदृशीति॥ अतः आत्मा नित्य-
मुक्तं ब्रह्मैवेत्यभिप्रायः॥२०॥ न त्वेवमप्यात्मनो जाग्रदाद्यवस्थात्रयं वक्तव्यं अहंकारस्य सुषुप्ता-
वभावेन सुषुप्त्यवस्थानुपपत्तौ जाग्रत्स्वप्नावस्थाद्वयसंबंधित्वस्याप्यनुपपत्तेस्तासां तिरणा-
मध्यकाश्रयत्वनियमात्॥ इत्याशंक्य॥ अहंकारस्य सुषुप्तौ संस्काररूपेण वर्तमानत्वात्तस्यै-
व सुषुप्तिर्नात्मनस्तस्य सुषुप्तिसाक्षित्वात्ततो जाग्रत्स्वप्नावप्यहंकारस्यैवेत्याह॥ ॥

=बुद्धिरेसम्पक्र
नामाश्रयो य
स्य तत् =५

= आविर्भवनधर्मस्य तिरोभवनधर्मस्य तयोर्भावस्वरूपे सर्वं = ८

सुप्तः सुप्तिं न जानाति नासुप्ते स्वप्नजागरौ ॥ जाग्रत्स्वप्नसुषुप्तीनां साक्ष्यतोऽहमनन्तदृक् ॥११॥ यः सुप्तः सुप्तिं न जा
नाति न वेत्ति सोऽहं न्यायात् चेत् सुप्तः सुषुप्त्यवस्थावान् नैव ज्ञातासौ ॥ कुतः स्यात् तेन सुषुप्तिकालीनाज्ञानसाक्षितया
जागरूकत्वादित्यर्थः ॥ ततश्चासुप्तः सुषुप्त्यवस्थारहितः प्रसंगान्नि स्वप्नजागरौ न भवतः तयोः सुषुप्त्यवस्था
समानाश्रयत्वादित्यर्थः ॥ हेत्वन्तरं क्रमप्याह ॥ जाग्रदित्यादिना यतो जाग्रत्स्वप्नसुषुप्तीनां साक्षी द्रष्टा अतोऽहमा
त्माऽनन्तदृक्ताः जाग्रदाद्याः दृशाः अवस्थाः यस्य सः तथा तद्दृगेन भवतीत्यतद्दृक् जाग्रदाद्यवस्थारहित

सुप्त

इत्यर्थः ॥ अत्रेदमनं विवक्षितं ॥ आत्मा जाग्रदाद्यवस्थावान्न भवति जाग्रदाद्यवस्थासाक्षित्वात् ॥ यो यत्साक्षी न स तद्
धर्मवान् यथा घटसाक्षी न घटधर्मवानिति ॥ तदुक्तमनन्यथनामसर्वज्ञात्ममुनिभिः ॥ तिस्रोऽपि विद्धि न तु तास्तव

= गोभंते =

ह्यवस्थास्ता हरेव कास्तिमते र्बहिरेव तावत् ॥ आविस्तिरोभवनधर्मतया स्ववस्थाः कः संकरो विमलचिद्वपु
षस्तवाभिरिति ॥११॥ जाग्रदाद्यवस्थालक्षणपर्यालोचनयापि नात्मनोऽवस्थासंबंध इत्याह ॥ ॥ विज्ञानवि

मिश्रीभाव =

रतिः सुप्तिस्तज्जन्म स्वप्नजागरौ ॥ तत्साक्षिणः कथं मे स्युर्नित्यज्ञानस्य ते त्रयः ॥१२॥ विज्ञानविरतिः विज्ञानस्य
विशेषज्ञानस्य विरतिस्तूपरतिः सुषुप्तिरित्युच्यते ॥ तज्जन्म तस्य विशेषज्ञानस्य जन्म उत्पत्तिः स्वप्नजागरावित्यु
च्येते ॥ तत्रापि वासनामयप्रपंचविज्ञानं स्वप्नः स्थूलप्रपंचविज्ञानं जाग्रदिति विभाग द्रष्टव्यः ॥ नतु किं
तत्राह ॥ तत्साक्षिण इत्यादिना ॥ नित्यज्ञानस्यालुप्तचिद्रूपस्य तत्साक्षिण उक्तलक्षणसुषुप्त्यादिसाक्षिणो मेऽमना
स्मानस्ते त्रयः सुषुप्तिस्वप्नजागराः कथं स्युर्न कथंचिदित्यर्थः ॥ अयं भावः ॥ सुषुप्त्यवस्थायां तावत्सुषुप्ति

स्वरूप

कालीनाज्ञानावभासकं किंचित्त्वेतन्यमंगीकर्तव्यं सर्वैरपि अन्यथा उत्थितस्य पुरुषस्य सुखमहमस्वाप्सं न

८

ते२

किंचिदवेदिषमिति सुषुप्तिकालीनाज्ञानपरामर्शानुपपत्तेस्तच्चैतन्यं न जन्यं मनश्चक्षुरादेः सुषुप्तावुपरत-
त्वाद् नेतं च तद् अन्यभावस्यानिरूपणीयमात्र ॥ तच्चैतन्यमस्माभिरात्मेत्युच्यते ॥ तथा च कथमनादिनित्यज्ञान-
स्वरूपस्यात्मनो ज्ञानोपरमरूपा सुषुप्तिः ज्ञानोत्पत्तिरूपो ऽस्य जागरोऽस्य ॥ अहंकारस्य तु जन्यत्वान्नित्यज्ञानाश्र-
यत्वात् त्रयमुपपद्यते ॥ ततश्चात्मा जाग्रदाद्यवस्थारहित इति ॥१२॥ इदानीमात्मनो निर्विकारत्वप्रसाधनाय दा-
य षड्भावविकाररहितत्वं साधयति ॥ ॥ षड्विकारवतो वेत्ता निर्विकारोऽहमन्यथा ॥ तद्विकारानुसंधाने स-

का

र्वथा नावकल्प्यते ॥१३॥ षड्विकारवतः षड्भावविकारवतः षड् ते भावाश्च ते विकाराश्च षड्भावविकाराः जायतेऽ-
स्ति वर्द्धते विपरिणमतेऽपक्षीयते विनश्यतीत्युक्तास्ते येषां संति ते षड्भावविकारवंतस्तेषां बाह्यघटा-
दीनां आंतरबुद्ध्यादीनां च वेत्ता ज्ञाताऽहमात्मा निर्विकारो विकाररहितो भवामि आत्मा हि बाह्यांतरव-
स्तूनां तु सत्तादिविकारान् जानाति अतो निर्विकारो भवतु महति ॥ यो यं जानाति न स तद्धर्मवानिति व्या-
प्तेर्लोकसिद्धत्वादित्यर्थः ॥ तदुक्तं वार्त्तिककृता ॥ न तेस्याद्विक्रिया दुःखी साक्षिता काविकारिणः ॥ धीवि-
क्रियासहस्राणां साक्ष्यतोहमविक्रियः इति ॥ विपक्षे दोषमाह ॥ अन्यथेत्यादिना ॥ अ न्यथा विकारसा-
क्षिणोपि विकारित्वे तद्विकारानुसंधानं तेषां विकारिवस्तूनां ये विकारास्तेषामनुसंधानं सर्वथा सर्वप्र-
कारेणापि नावकल्प्यते न संभवतीत्यर्थः अयमभिसंधिः ॥ आत्मनोपि विकारित्वे किमात्मन इतरेषां

भाव:=१ रि १

श्री

च विकाराः आत्मनाऽज्ञायंते उ तेन तेन रूपेण भ यथापि विकारिवस्तुनो मृदादिवत्तद्वत् च नियमादिति ॥१३॥ किं
च विकारिवस्तुनो विकाराणां च कोऽपि भेदः उताभेदः ॥ नाद्यः । भिन्नयोर्गवाश्वयोरिव विकारिविकारभा
वानुपपत्तेरित्यभिप्रेत्य द्वितीयपक्षे दूषणमाह ॥ ॥ तेन तेन हि रूपेण जायते लीयते मुहुः ॥ विकारि
वस्तु तस्यैषामनुसंधाता ते ता कुतः ॥१४॥ तेन तेन रूपेण उत्पत्त्यादिविकाररूपेणा तदभिन्नं विकारिवस्तु
पि जायते उत्पद्यते मुहुः ॥ राश्च लीयते नश्यति च तयोरभेदादित्यर्थः ॥ हि यस्मादेवं तस्मात्तद्विकारि
न वस्तु एषां विकाराणामनुसंधाता ता कुतः अनुसंधानकर्तृ न कुतोऽभवेदित्यर्थः ॥ तत्तद्विकाररूप
ता तदा तदा नश्यतः विकारिवस्तुनः कथं कालांतरीयविकारानुसंधानं घटते न कथंचिदित्यर्थः ॥१४॥
न त्वात्मा स्वयं विकारिसन्नप्यात्मनः तरपांच विकारान् विजानातु ॥ न च तस्य विकारित्वावि रा
शेषे कथं स्वेतरपरिज्ञानमिति वाच्यं ॥ शिलात्वाऽविशेषेपि रत्नस्य स्वभावविशेषेण स्वेतरा
भासकत्ववदात्मनोपि स्वभावविशेषेण स्वेतरविकारानुसंधानोपपत्तेः ॥ न च तेन तेन विकारेणा सा
कं नष्टस्य कथं सर्वविकारानुसंधानमिति वाच्यं ॥ तस्य विकारित्वाऽभिमतेनो विकारैः संताभेदस्या
नंगीकारात् ॥ किंतु दुर्घटघटिताभेदस्य तादात्म्यस्यैव तत्तु पक्षयोरिवांगीकारादित्याशंक्य एव श्री कृष्ण
मप्यात्मन आद्यंतविकारद्वयानुसंधानं न संभवतीत्याह ॥ ॥ न च स्वजन्म

नाशौ वा द्रष्टुमर्हति कान्वेन ॥ तौ हि प्रागुत्तराभाव-चरमप्रथमक्षणौ ॥ १५ ॥ कान्वेन कश्चिदपि पुरुषोऽपि स्व-
जन्मस्वोत्पत्तिं नाशं च स्वसंवादं द्रष्टुं ज्ञातुं नार्हति न शक्नोतीत्यर्थः ॥ तत्र हेतुमाह ॥ तौ हीत्यादि-
ना ॥ हि यस्मात् तौ जन्मनाशौ प्रागुत्तराभाव-चरमप्रथमक्षणौ प्रागुत्तरौ यौ अभावौ प्रागभाव-
प्रध्वंसाभावौ तयोर्यौ चरमप्रथमक्षणौ तौ प्रागुत्तराभाव-चरमप्रथमक्षणौ प्रागभाव-चर-
मक्षणो जन्म निर्वस्तुनः ॥ प्रध्वंसाभावप्रथमक्षणो नाश इत्यर्थः ॥ यस्माज्जन्मनाशौ प्रागु-
त्तराभाव-चरमप्रथमक्षणौ तस्मात् स्वजन्मनाशं द्रष्टुं नार्हतीति संबन्धः ॥ इदमत्राकूतं ॥ अयं भावः ॥
आत्मा हि स्वसमानकालीनवस्त्वेव जानाति नेतरदित्यर्थः ॥ दीपवद्वर्तमानकालीनपदार्था-
वभासकः ॥ तथा च स्वावस्थानसमये अविद्यमानयोः प्रागभावप्रध्वंसाभावयोः परिज्ञा-
नाभावे कथं प्रागभावचरमक्षणरूपं जन्मप्रध्वंसाभावप्रथमक्षणरूपं नाशं च ॥ आनीत

18

न कथंचिदित्यर्थः ॥ तयोश्चासिद्धौ मध्यवर्तिविकाराणामप्यसिद्धिरेव तेषामपि विकाराणा-
मुत्पत्तिनाशवत्त्वेन यत्वनियमात् ॥ तदुक्तं वाक्यवृत्तौ भाष्यकारैः देहेन्द्रियमनःप्राणाहंकृति-
भ्यो विलक्षणः ॥ प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभिचरति ॥ ततश्चात्मानिर्विकारत्वात्
ब्रह्मैवेत्यर्थः ॥ २५ ॥ ननु पूर्वोक्तं सर्वं वृथा आत्मन उक्तस्वरूपब्रह्मत्वज्ञाने प्रयोजनाभावा-
त् ॥ न च संसारनिवृत्तिरात्मनो ब्रह्मत्वज्ञाने प्रयोजनमिति वाच्यं ॥ तन्निवृत्तेरसंभवा-
त् ॥ संसारो ह्यात्मनि अहंकारोपाधिना प्रतीयमानः कर्तृत्वादिः स च न ज्ञानेन निवर्त-
यितुं शक्यः तस्यात्मनि सोपाधिकभ्रमत्वात् सोपाधिकभ्रमस्य च यावदुपाध्यवस्थानं तत्त्व-
ज्ञानेऽप्यवस्थानात् ॥ लोके सोपाधिकभ्रमस्य प्रतिबिंबचलनादेर्यावदुपाधिचलनं प्रतीति-
तिः ॥ न चोपाधेः अहंकारस्य ब्रह्मज्ञानेन निवृत्तौ तत्प्रयुक्तस्यात्मनि प्रतीयमानकर्तृत्वा-
देरपि निवृत्तिरिति वाच्यं ॥ तस्य तत्त्वज्ञाने सति निवृत्तेरभावात् ॥ न च तत्त्वज्ञानस्याप्या-

नुभवनिमित्तत्वादित्यर्थः ॥ तं स्वप्रकाशं स्वयमेव ज्ञानमात्म
प्यात्मानं न प्रकाशः ९

सन्निधीयमानस्य ब्रह्मज्ञानान्निवृत्तिरिति वाच्यं ॥ तस्य कल्पक[illegible]भावेन कल्पकतया ज्ञानेन
निवर्तयितुमशक्यत्वात् ॥ अन्यथाऽज्ञानस्यानवस्थाप्रसंगादिति भावः ॥ अस्य अज्ञानस्य ज्ञान
निवर्त्यत्वासिद्धये कल्पितत्वं वक्तुं तस्यात्मनि वस्तुतोऽसंभावमाह ॥ ॥ न प्रकाशोऽहमित्युक्तिर्य
त्प्रकाशैकबन्धना ॥ स्वप्रकाशे तमोऽज्ञानमप्रकाशः कथं स्पृशेत् ॥ १८ ॥ अहं न प्रकाशे न भा
मीत्युक्तिर्वचनं यत्प्रकाशैक[illegible]बन्धना ॥ यस्य प्रकाशः स्वरूपप्रकाश एक एव निबन्धनं निमि
त्तं यस्याः सा तथोक्ता ॥ न प्रकाश इति व्यवहारोऽस्य स्वप्रकाशो अज्ञानं कथं स्पृशेद् दूषयेदावृणुयात् कि
ंचिदित्यर्थः ॥ अयं भावः ॥ आत्मा हि सर्वदा स्वयंभासमानः सन् सर्वं भासयति स कथमज्ञानेन
प्रकाशाविरोधिना स्पृश्येत न हि खरतरकिरणशालिश्रीदीनकरस्तमसा स्पृश्यमानो दृश्यते ॥ त
त्कस्य हेतोः प्रकाशाप्रकाशयोर्विरोधात् ॥ तथा चाज्ञानस्यात्मनि युक्त्या सह ज्ञानपरमार्थतः संभ
वः ॥ १९ ॥ ननु कथं तर्हि न प्रकाशे इत्यात्मन्यज्ञानानुभवस्तत्राह ॥ सूर्ये पेचकादीनामन्धकार
प्रतीतिवदज्ञस्याप्युपपद्यततरसाह ॥ तथापि भाति कोऽप्येष विचाराभावजीवनः ॥ अवस्त्वाय
निशाकरोऽविचारोर्कोदयावधिः ॥ २० ॥ यद्यपि वस्तुत आत्मन्यज्ञानं न संभवति तथाप्य

अ० द्वै०

११

मिति वाच्यं। आत्मस्वरूपस्य प्रकाशस्याविरोधित्वे ७

चेउ प्रकाशश्च अव[..]च्छायायो नीहारः। अवच्छायाप्यवत् आवरकत्वं चित्प्रकाशो नित्यप्रकाश आत्मन्याभा
तीति संबंधः। असतोऽन्यस्य वस्तुतोऽसत्वे कथं प्रत्यक्षप्रतीतिः। न ह्यसतः शशशृङ्गविषा[..]णादेः प्रत्यक्ष
प्रतीतिरस्तीत्याह। कोऽपीति। कोऽपि सत्वासत्वाभ्यामनिर्वचनीया प्रकाशस्य स[..]द्विलक्षणतांगीका
रान्न प्रत्यक्षप्रतीत्यनुपपत्तिरित्यर्थः। नन्वेवमप्यप्रकाशस्यात्मन्यनुभवेनोपपद्यते। तथाहि किं
जडं व स्वप्रकाशविरोधि उत स्वप्रकाशरूप आत्मा नाद्यः जडप्रकाशयोः परस्परविरोधासंभ
वान्नापि द्वितीयः। तस्य विरोधित्वे निःस्वप्रकाशस्य आत्मनि अवस्थानानुपपत्तेः। न चाहं न प्रकाशस्य
त्वान साधकस्य ना[..]त्वान विरोधित्वे अन्यस्यापि विरोधिनो अभावे कदापि निवृत्तिर्न स्यात्। त
त्राह। विचारोदयावधिरिति। विचारो विचारजन्यज्ञानमेवार्कः सूर्यस्तमो निवर्तकस्य उदयउत्पत्तिः।
साऽवधिर्मर्यादा यस्या प्रका[..]शस्य स विचारोदयावधिरित्यर्थः। केवलात्मनो विरोधि
त्वेपि अखण्डाकारवृत्त्यारूढात्मचैतन्यस्य तन्निवर्तकत्वोपपत्तेः केवल[..] सूर्यकिरणस्यादग्धृत्वेन तृणा
दिभासकत्वेपि सूर्यकान्तसंयुक्तस्य दग्धृत्वदर्शनादिति भावः। किमिति तर्हि वाक्यजन्याखण्डाकार

=प्रकाशस्य

टी०

कलौन

कु.स्ल

११

यत्तोसत्यामपिसर्वेषामात्मज्ञानेननिवर्ततइत्याशंक्याह।। विचारभावजीवनइति।। विचाराभावा एव
[illegible] ण्व [illegible]मननरूपयोर्वेदांतप्रमाणतत्प्रमेयब्रह्मविषययोर्विचारयोरभाव एव जीव
वनमवस्थितिहेतुर्यस्या प्रकारांतस्य सविचारभावजीवनस्तस्यार्थः। वाक्या ज्ञान्याप्यखंडाकारवृ
[illegible]त्तिरसंभावनादिभिः प्रतिबद्धा सती नाज्ञानं निवर्तयति यथा मणिमंत्रादिप्रतिबद्धोऽग्निः सं
युक्तमपि तृणादिकं न दहति तद्वत् तदुक्तं सर्वज्ञमुनिभिः। पुरुषापराधमलिनाविषयाणि
रवेश्चक्षुरदयापि यथा।। नफलायभजुविषयाभवतिसंभवापितुतथामनिचीरितिः।। यदा

स्मृति ६

तु सम्यग्विचारेण असंभावनाद्यो निवर्तते तदाऽप्रतिबद्धा सती अज्ञानं निवर्तयति य
था मण्यादि प्रतिबंधनिवृत्तौवह्निस्तृणादिकं दहति तद्वत् एतदपि तैरेवोक्तं ।।
पुरुषापराधविगमे तु पुनः प्रतिबंधकच्युत[illegible]सनात्सफला।

ॐ ३

मणिमंत्रयोरपगमे तु यथासति पावकाद्भवति प्रमल्लतेति ॥ तथाचाज्ञानस्यानिर्वच
नीयस्य कल्पितत्वेन ज्ञानान्निवृत्त्युपपत्तिः नचतस्य कल्पकाभावः अज्ञानस्य
लौकिकदीपवत् । भाट्टमते स्फुरणवत् । गुरुमते संवेदनवत् गुरुबौद्धव्यति
रिक्तमते भेदवच्च स्वपरनिर्वाहकत्वाभ्युपगमनवत्त्वात् अज्ञानांतरस्या
नंगीकारात्तथाचाज्ञानस्य [illegible] ज्ञानान्निवृत्तौ मूलच्छेदेन अहंका
रस्य निवृत्तिसंभवात् आत्मनि प्रतीयमानस्याहंकारोपाधिप्रयुक्त

कर्मकांडाप्र :३

स्य कर्तृत्वादिरूपसंसारस्यापि निवृत्तिर्भवतीति प्रत्यगात्मनो ब्रह्मत्वज्ञानं सफलमि-
ति भावः ॥१७॥ ननु ब्रह्मव्यतिरिक्तस्य सर्वस्याज्ञानकल्पितत्वे तथा परमार्थतोऽसत्वे
कर्मकाण्डा प्रामाण्यं स्यात् ॥ स हि स्वर्गकामादेर्यागादिकर्तव्यतां बोधयति तच्च नि-
योगस्यापूर्वस्य नियोज्यस्य पुरुषस्य नियोगविषयस्य यागस्य नियोगफल-
स्य स्वर्गस्य च परमार्थतोऽसत्वे बोधनं अनुपपन्नं स्यात् ब्रह्मव्यतिरिक्तस्य
परमार्थतो सत्वे उपनिषदप्रामाण्यं स्यात् ॥ तत्रापि हि मोक्षकामस्य आ-
त्मा वारे द्रष्टव्य इत्यादिना श्रवणादिकर्तव्यता बोध्यते ॥ तस्यापि प्रामाण्यमयुक्तं
कर्मकाण्डोपनिषदेकदेशयोरपि ब्रह्मवाक्येन सह संप्रदायस्य तुल्यत्वादि स्यात्तां
क्य किं तत्वज्ञानोत्तरकाले कर्मकाण्डस्य प्रामाण्यमापद्यते ॥ किं वा ततः पूर्वकाले
नाद्यः ॥ तदुत्तरकाले प्रामाण्यस्य गार्हस्थ्य ब्रह्मचारिधर्मवेदकश्रुतेरिव संन्या

= अप्रामाण्यस्य इत्यादि इत्यर्थः = २
तद२

स्मिन् जगन्मये ॥ दीर्घस्वप्ने स्फुरंत्येते स्वर्गमोक्षादिविभ्रमाः ॥ १८ ॥ आत्माज्ञानमहानिद्राजृंभिते

साश्रमकाले अग्निहोत्रादिकृते रिव च इष्टत्वादित्यभिप्रेत्य द्वितीयं पद्यमाह ॥ ॥आ
त्माज्ञानमहानिद्राजृंभिते आत्माज्ञानं प्रत्यगात्माश्रयविषयमज्ञानं तदेव महती निद्रा
अनादिकालमारभ्य प्रवृत्तत्वात् स्वरूपावरणपूर्वकविपरीतरूपहेतुत्वाच्च ततो जृंभि
ते उत्पन्ने जगन्मये जगद्रूपे ऽस्मिन्ननुभूयमाने दीर्घस्वप्ने तत्त्वज्ञानपर्यंतमनुव
र्तमाने एते स्वर्गमोक्षादिविभ्रमाः स्वर्गमोक्षादिर्वा येषां भ्रमणां ते तथा स्वर्गशब्दः
तत्कामिनियोज्यनियोगतद्विषययागादेरप्युपलक्षणं मोक्षशब्दश्च तत्साध
नज्ञानतत्साधनश्रवणादेरप्युपलक्षणं आदिशब्दो लौकिकव्यवहारानुकूलपुत्र
मित्रादिसंग्रहार्थः ॥ मोक्षस्य बंधसापेक्षत्वाद्बंधस्य चैतत्सापेक्षमोक्षस्यापि विभ्रमत्व
मिदं दृष्टव्यं स्फुरंति स्फुरंत्येव न न स्फुरंतीत्यर्थः ॥ अयं भावः ॥ तत्त्वज्ञानात्पूर्वकाले
व्यावहारिकसत्तस्य सर्वस्य जगतो नियोज्यनियोगादेः सत्त्वेन प्रबोधात्पूर्वं स्व
प्नादाविव सर्वव्यवहारोपपत्तेर्नैककर्मकांडप्रामाण्यं ॥ तस्य व्यावहारिकप्रामाण्यस

मिथ्यात्व

शुभं

त्वात्तावतान्वतस्यापि चेतार्थत्वेऽस्मत्सिद्धान्तामगतिकानां ब्रह्मवाक्यानां परमार्थस
त्यविषयाणां नाऽकस्माद्वाच्योयुक्तः तदर्थस्य च व्यवहारसत्तेति तत्त्वेन व्यावहारिकप्रामा
ण्यानुपपत्तौ ब्रह्मवाक्यानां तात्त्विकप्रामाण्यस्यांगीकारे किंचिदपि प्रामाण्यं न
स्यात्प्रकारभेदेन उभयप्रामाण्योपपत्तौ सर्वात्मना तत्प्रामाण्यं न युक्तं तदुक्तं स
कलवेदार्थत्वेन ब्रह्मणोऽपि॥ परमार्थो द्विप्रकारो मया हे स्वर्गवासिनः॥ एकः
स्वभावतः साक्षात्परमार्थः सदैव तु॥ सशिवः सत्यचैतन्यसुखानंतस्य लक्ष
णः॥ अपरः कल्पितः साक्षाद्ब्रह्मण्यध्यस्तमायया॥ व्यावहारिकसत्यार्थं साक्षात्
सत्यार्थं चिद्घनं॥ उभयं च वक्ति वेदस्तु मार्गविवेवं वदंति हि॥ ततोऽद्वितीयब्रह्म
ण एव परमार्थसत्यत्वेऽपि व्यावहारिकसत्यार्थेनार्थवत्त्वात् कर्मकाण्डस्य प्रामाण्य
मिति॥१८॥ नन्वेवमपि जीवस्य भोक्तृत्वं तद्भोग्यजातस्य च ब्रह्ममात्रत्वे
अनुभूयमानो भोक्तृभोग्यविभागो न स्यात् सर्वस्य ब्रह्मण्यध्यस्तत्वाविशे
षादित्याशंक्य मायावशादेव विभागोऽयमुपपद्यत इत्याह॥ ॥जडाजडवि

का१

प्र३

28

= तमःप्रधानः तमोगुणप्रधानमायोपाधिकः जीवानां शरीराणां भावनाज्ञानकर्मभिः भावनासंस्कारः ज्ञानं देवताध्यानादि कर्म पुण्यापुण्यलक्षणानि = ५

अद्वैतम

भागोयमजडोस्मि कल्पितः ॥ भित्तिभागे समे चित्रे चराचरविभागवत् ॥१९॥ जडा
जडविभागः जडमिदं भोग्यमजडोयं भोक्तेति विभागः ॥ अयं प्रतीयमानः अज
डे अलुप्तचैतन्यस्वभावे मयि प्रत्यगभिन्ने ब्रह्मणि कल्पितः मायया आरोपित
इत्यर्थः ॥ स्वप्रकाशे रोपकस्मिन् ब्रह्मणि उपाधिप्राधान्याद् भोग्यजडकल्पना ॥ उपा
धेयप्राधान्याद् अजडभोक्तृत्वकल्पनाप्युपपद्यते ॥ तदुक्तं वार्तिककारैः ॥ तमःप्र
धानः क्षेत्राणां चित्प्रधानः चिदात्मनां ॥ परः कारणतामेति भावनाज्ञान
कर्मभिः इति ॥ अजडे ब्रह्मणि सदृशविसदृशोभयकल्पने दृष्टांतमाह ॥
भित्तीत्यादिना भित्तिभागे कुड्यप्रदेशे समे निर्विकारे अचल इत्यर्थः
॥ चराचरविभागवत् चरस्य गजादेः अचरस्य पर्वतादेश्च विभागो यथा
तथेत्यर्थः ॥१९॥ नन्वेवमात्मनो ब्रह्मत्वं न संभवति तस्य संसारसाक्षितारू
पकल्पनायुक्तत्वात् ब्रह्मणश्चास्थूलमनण्विति नेति नेतीत्यादिश्रुत्या निर्विकल्प

१४

= जीवानां

= उपमाधी वते परमित त्वभाधिष्ठा नचैतन्य = ४

= चराचर =

रूपग

१४

(२७)

तथा सिद्धेरित्याशंक्याह ॥ ॥ चेत्योपरागरूपा मे साक्षितापि न तात्त्विकी ॥
उपलक्षणमेवेयं निस्तरंगचिदंबुधेः ॥२०॥ चेत्योपरागरूपा चेत्यं कर्तृत्वादिप्रपंचः ॥ ते
न उपरागः संबंधः तद्रूपा साक्षितापि साक्षित्वमपि मम प्रत्यगात्मनः न तात्त्विकी न
परमार्थभूता चेत्यस्यापरमार्थत्वेन तत्संबंधिसाक्षिताया अपि परमार्थस्वरूप
त्वायोगात् ॥ किंत्वियं साक्षिता ॥ निस्तरंगचिदंबुधेः ॥ निस्तरंगः परमार्थतो निर
स्तरंगः कर्तृकृत्यादिप्रपंचरूपो यस्याः सा चिदेवांबुधिस्तस्य मम प्रत्यगात्म
न उपलक्षणमेव ॥ तटस्थासतिस्यापि केवजगत्कारणत्वमिव ब्रह्मणस्तथा
चात्मनः ॥ वस्तुतो निर्विकल्पात्वान्नब्रह्मत्वानुपपत्तिरिति भावः ॥२०॥ एव
मुक्तेन प्रकारेण ब्रह्मणि जगतः आत्मनि चाहंकारादेः कल्पितत्वेन वस्तुतो
अभावात्सदद्वयलक्ष्ये ब्रह्मणि न कश्चिदपि विकल्पावसर इत्याह ॥ ॥
अमृताब्धेर्न मे तीर्णोर्मिविडिंडिरजन्मभिः ॥ स्फटिकाद्रेर्न मे रागः स्वाप्रसं

रंजनात्

त

ध्यात्रविभ्रमैः ॥ २० ॥ अमृतः मोक्षरूपः स्वयंप्रकाशाद्वयानंद एवाब्धिस्तस्य
तत्सदलक्ष्यस्येत्यर्थः ॥ मेममम प्रत्यगभिन्नब्रह्मणः मृषाडिंडिरजन्मभिः मृषारूपा
मिथ्यारूपा वियदादय एव डिंडिराः फेनास्तेषां यानि जन्मानि तैर्जन्मभिः जन्म
पदं नाशस्याप्युपलक्षणं नजीर्णिर्न हानिर्वद्धि[illegible]र्वा जीर्णिपदं वृद्धेरप्युपलक्षणं मि
थ्यावस्तुनोऽधिष्ठानाऽदूषितत्वादित्यर्थः ॥ ब्रह्मणो मायया वियदाद्युत्पत्तावधिष्ठा
नब्रह्मणो न हानिर्न वृद्धिरित्येतत्तु भारतीतीर्थैरपि कूटस्थदीपे भाषितं ॥ मायामेघो जग
न्नीरं वर्षत्वेवमथातथा ॥ चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिरिति ॥ त्वं
पदलक्ष्यमपि शुद्धमित्याह ॥ स्फटिकाद्रेरित्यादिना स्फटिकाद्रेः स्फटिकाद्रिवत्स्वच्छ
स्यमे प्रत्यगात्मनः स्वपदलक्ष्यस्य स्वात्मसंध्याभ्रविभ्रमैः स्वात्मनः अविद्याकल्पितोऽ
हंकारादिः स एव संध्याभ्रं संध्याकालीनमेघः स्वसन्निहिते स्वच्छे स्वच्छमसि
संजकत्वसाम्यात्तस्य लैर्विभ्रमैः कर्तृत्वादिभ्रांतिभिः मे च विषये विभ्रमाः
अनवनाः निःसंचाराः तैः रागः संबंधो मे च विषये आरुण्यं स्फटिकपर्वतस्यारुण्यवत् ॥

स्था २

वेदांतसं १

आत्मनः परमार्थतः कर्तृत्वैरागद्वेषादिसंबंधो नास्तीत्यर्थः। अहंकारादिधर्मैरात्मनोऽसंबंधोपि भाम
तीतीर्थैरेवाभाणितं चित्रदीपे॥ अहंकारगते च्छाद्यैर्देहाध्यासादिभिस्तथा॥ वृक्षीदिजन्मना
शेवी चिद्रूपात्मनि किंभवेदिति॥ अतः पदद्वयलक्ष्यमपि चैतन्यमतिशुद्धमितिभावः॥२१॥ ननु एव
मपि पदद्वयलक्ष्य ब्रह्मण्यस्यैव विकारः तस्य ब्रह्मणः परमार्थतः सत्ताश्रयस्यैव वक्तव्या। तात् अन्यथाश
शविषाणवदसत्त्वप्रसंगादित्याशंक्याह॥ स्वरूपमेव मे सत्त्वं ननु धर्मो नभस्त्ववत्॥ मदन्यस्य सतोभा
वाच्च हि सा जातिरिष्यते॥२२॥ मे मम पदद्वयलक्ष्यस्य सत्त्वं स्वरूपमेव न तु मदाश्रितो धर्मः सत्त्वाश्रयत्वा
भावेपि न मे असत्त्वं। यथा सत्त्वस्य सत्त्वांतराश्रयत्वाभावेपि नासत्त्वं तद्वदित्यर्थः। ननु घटे घटत्ववत् स
द्रूप आत्मन्यपि धर्मरूपं सत्त्वं नस्यादित्याशंक्य घटे ध्वनेकेषु घटोयं घटोयमित्यनुगतव्यवहारसिद्ध
ये घटत्वजातिरिव सद्व्यक्तिभेदाभावेन आत्मनि सत्त्वरूपा जातिर्नोभीकार्येत्याह॥ मदन्यस्येत्यादि
ना मदन्यस्य पदद्वयलक्ष्यरूपात्मभिन्नस्य सतः सद्व्यक्त्यंतरस्याभावात् सा सत्त्वरूपा जातिर्नेष्यते
कव्यक्तौ जात्यनंगीकारे दृष्टांतमाह॥ नभस्त्ववदिति घटादिष्वनुगतव्यवहारार्थं घटत्वजातिरंगी
क्रियते॥ अत्र तु वियदादेः सर्वस्य मिथ्यात्वेन सदंतरस्याभावात् अनुगतव्यवहारार्थं घटत्ववज्जा

तिरूपं सत्वं नांगीक्रियते॥ किंतु स्वरूपमेव तत्तु न धर्मस्त्ववत्॥ ननु घटः सन् पटः सन् कुंभः सन्नि
त्यादिप्रतीत्यनुरोधेन घटपटाद्युपाधिभिन्नेषु सत्स्वनुगतव्यवहाराय सत्वं जातिरंगीक्रियतामि
ति चेन्न॥ घटादि उपहितेषु सर्वेषु अनुगतब्रह्मरूपसन्मात्रत्वेनैव घटपटाद्युपाधिभिन्नेष्वाका
शेषु अनुगतमहाकाशेनैव अनुगतव्यवहारोपपत्तेः तस्मान्न सत्वं जातिः॥ अत एव नोपाधिर
पि अनुगतव्यवहारायैव॥ तस्यापि कल्पितत्वात् सत्वस्य सन्मात्रब्रह्मरूपत्वं विशिष्टेनाप्युक्तं॥ वि
शेषं संपरित्यज्य सन्मात्रं पदलेपकं॥ एकरूपमहारूपं सत्तायास्तत्परं विदुरिति॥ तथा च सत्व
स्य स्वरूपत्वेन धर्मत्वाभावादत्यंतशुद्धमेव पदद्वयलक्ष्यमिति भावः॥ ननु एवमप्यात्मनो ज्ञानाश्र
यत्वमंगीकर्त्तव्यं॥ अन्यथा घटादिवदनात्मत्वप्रसंगात्॥ ज्ञानाश्रयस्यैवात्मत्वादहं जानामी
त्यात्मनो ज्ञानाश्रयत्वप्रतीतेश्च तथा च साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुत्या कथं निर्गुण
ब्रह्मत्वमात्मन इत्यत आह॥ ॥स्वरूपमेवमे ज्ञानं न गुणः सगुणो यदि॥ आनात्मत्वमसत्वं वा ज्ञेया
ज्ञेयत्वयोः पतेत्॥ ३३॥ मे मम मज्ज्ञानं चैतन्यं स्वरूपमेव न तु मम आश्रितो गुणः कुत इत्यत आह॥ सगु
णायदित्यादिना स चैतन्यं विधेयापेक्षया पुल्लिंगनिर्देशः॥ चैतन्यं गुण इति वदन् वादी
प्रष्टव्यः॥ किं तेन चैतन्येन आत्मा विषयीक्रियते न वा उभयथापि दूषणमाह॥ अनात्मत्वमिति॥

ज्ञेयाज्ञेत्वयोरात्मनो वेद्यत्वे अनात्मत्वं घटादिवद वेद्यत्वे चासत्वं वा शशविषाणवदापत्तेद्वे वेदि
सर्थः।। यद्यात्मनः स्वस्य मवेत्तज्ज्ञानाविषयत्वमुच्यते।। तदा अज्ञायमानत्वेन आत्मनोऽसत्वं
स्यात्।। नहि प्रमाणतोऽज्ञायमानं शशशृंगविषाणमस्तीति केनचि[illegible]त्प्रतिपद्यते।। यद्येतद्दोषपरि
जिहीर्षया तस्य ज्ञायमानत्वमुच्येत।। तदा घटादिवदनात्मत्वमात्मनः स्यात्।। ज्ञानविषयस्यानात्मत्व
नियमात्।। नन्वात्माश्रितज्ञानेन आत्मा आश्रयत्वेन भासते।। न विषयत्वेनायेन घटादिवदनात्मत्वं
स्यादिति चेन्न।। ज्ञानव्यतिरिक्तस्य ज्ञानाधीनप्रकाशस्य ज्ञानविषयत्वनियमेन आत्मनोऽपि ज्ञाना
धीनप्रकाशस्य विषयतया अवश्यकत्वेन अनात्मत्वदोषतावदवस्थ्यात्।। न च ज्ञानाश्रयत्वमात्म
त्वेप्रयोजकं लाघवात्। ज्ञानत्वस्यैव तत्प्रयोजकत्वादहं जानामीति प्रतीतेश्च अहंकार
वृत्तिविषयत्वात्।। न च ज्ञानोत्कृष्टं ज्ञानमुत्पन्नमिति प्रतीत्या तस्य जन्मादिमत्तः आत्मत्वम
नुपपन्नमिति वाच्यं।। तस्यापि वृत्तिविषयत्वात्।। तस्मादात्मनो न ज्ञानं गुणः।। किंतु स्वरू
पमेव बादरायणोऽपि लोकवत्त्वेसात्मनो ज्ञानरूपत्वं सूत्रयांबभूव।। सूत्रस्यार्थो विषं
धारण्यगुरुभिरधिकरणरत्नमालायां दर्शितः।। अचिद्रूपो यश्चिद्रूपो जीवोऽचिद्रूपद्रव्य
ते।। चिदभावात्सुखादौ जागच्छिन्मनसाकृतेति पूर्वपक्षप्राप्ते सिद्धांतमाहा।। ब्रह्मत्वादेव

ना

चिद्रूपश्चिवत्सुषुप्तौ न लुप्यते॥ द्वैतादृष्टिर्द्वैतलोपो न हि द्रष्टुरिति श्रुतेरिति॥ ननु ज्ञानरूप आत्मा स्वात्मानं जानाति न वा जानाति जानातीति चेद्युगपत्कर्मकर्तृत्वविरोधप्रसंगः॥ न चेज्जानातीति तस्यासत्त्वप्रसंग इति चेन्न॥ तस्य स्वरूपप्रकाशत्वेन ज्ञानांतरमनपेक्ष्यैवभासमानत्वात्॥ नापि तस्य कर्मकर्तृत्वे स्वविषयत्वानंगीकारात्॥ अतः उक्तं विद्यारण्यगुरुभिः॥ पंचकोशविवेके॥ स्वयमेवानुभूतित्वाद्विद्यते नानुभाव्यते॥ ज्ञातृज्ञानांतराभावादज्ञेयो न त्वसत्तयेति॥ यत्प्रसादाद्धि सर्वं जगद्भासते स कथं नास्ति न प्रकाशते वा आत्मनः सर्वावभासकत्वं स्वस्य अन्यानपेक्षतया भासमानत्वं च आत्मयोगेन्चिदंशेष्पुक्तं॥ अज्ञानतत्कार्यतदीयभेदानध्यक्षयंतीनिजसत्तयैव॥ स्मर्तुं च विस्मर्तुं अहोनशाक्यासुप्त्यादिषु स्वप्रभया स्मि साक्षिदिति॥ तस्मादात्मा ज्ञानरूपो न ज्ञानगुणक इति स निर्गुणं ब्रह्म भवेदिति भावः॥२३॥ एवमात्मन आनंदोपि न गुणः किं तु स्वरूपमेवेति साधयति॥ ॥अहमेव सुखं नान्यदन्यच्चेन्नैव तत्सुखं॥ अमदर्थं न हि प्रेयो मदर्थं न स्वतः प्रियं॥२४॥ अहमात्मा सुखमेव सुखस्वरूप एव न तु सुखगुणकः यदि सुखमासनोन्यद्गुणः स्यात्सुखत्वेनाभिमतं नैव तत्सुखं स्यात्कुतः इति चेत्किं देतेनात्मप्रकृतं सुखमनात्मशेषः उतत्मशेषो वानाद्य इत्याह॥ अमदर्थमिति॥ अमदर्थं चेदित्यनुषंगः आत्मशेषो न चेन्न हि प्रेयः प्रीतिविषयो न भवेत्॥ अनात्मशेषसर्पादौ प्रीतिविषयत्वादर्शनात्॥ न द्वितीयमित्याह॥ मदर्थमिति॥ अत्रापि चेदित्यनु

मात्मशेषत्वे स्वतः प्रियं न स्यात्॥ आत्मशेषस्य पुत्रभार्यादेः स्वतः प्रीतिविषयत्वादर्शनादित्यर्थः॥ सुखं हि सर्वे
षां प्रियं भवति तत्स्वतएव प्रियं न परोपाधिना अतः सुखं आत्मैव भवितुमर्हति॥ कथमिति चेच्छृणु जगति सर्वे
षां पदार्थानां चतुर्धा व्यवस्थितिः॥ आत्मा प्रियः प्रियउपेक्ष्यश्चेति सुखं तावन्न व्याघ्रादिवदप्रियं॥ तस्य सर्वैः प्रार्थ्य
मानत्वात्॥ अतएव न लोष्ठादिवदुपेक्ष्यं नापि प्रियमात्रं तच्छे[ष]पुत्रभार्यादावपि तद्दर्शनात्॥ अतः परिशेषा
दात्मैव॥ ननु आत्मशेषत्वेन तस्य प्रीतिविषयत्वं किं न स्यादिति चेत्तर्हि वक्तव्यं आत्मनि प्रीतिः किंनिमित्तेति॥
येन सुखमपि तच्छेषतया प्रियं जायते॥ सुखसाधनत्वादिति चेत्तर्हि सुखसाधनेन आत्मना उपकार्यः कश्चिद्वक्त
व्यः स्रक्चंदनसुखसाधनेन अन्यस्यैवोपकार्यत्वदर्शनात्॥ आत्मनि च कर्मकर्तृविरोधात्॥ स चोपकार्यो
न्यो न दृश्यते तस्मान्न सुखसाधनतया आत्मा प्रियः किंतु सुखस्वरूपतया॥ तस्मान्नात्मशेषतया सुखस्या
पि प्रियत्वं किं त्वात्मतैव॥ ननु सुखमुत्पन्नं नष्टमिति प्रतीयमानस्य कथमात्मत्वमिति चेन्न॥ तस्य तद्व्यंजक
वृत्तिविषयत्वात्॥ सर्वमेतदुक्तं ब्रह्मानंदे॥ आत्माशेषमुपेक्ष्यं चद्वेष्यं चेति चतुर्ष्वपि॥ आत्मा प्रियान्त्रि

अद्वैतम०

१८

=आत्मादीनां प्रियतमत्वादिरूपवत्तत्र याज्ञवल्क्यस्याभिमतं=१
=अत्र लोके अमुना सुखसाधनेनानुकूलेनानुकूलयितव्यः कः स्यात् न कोपि स्यात् आत्मा
तिरिक्तस्य पारतंत्र्यभावादिसर्वः ॥ ननु स्वयमेवानुकूलयितव्यः स्यादित्यत आह नैकस्मिन्निति=२

=प्रीयत्वात

यः शेषो द्वेष्योपेक्ष्येतदन्ययोः ॥ इति व्यवस्थितो लोके कोयाज्ञवल्क्यमतं स्मृतम् ॥ सुखसाधनतोपाधेरन्नपानादयः क्रियाः ॥ आत्मानुकूल्यादन्नादिसमश्चेदमुनात्र कः ॥ अनुकूलयितव्यः स्यान्नैकस्मिन्कर्मकर्तृतेति ॥ आत्मनः सुखरूपत्वं सर्वज्ञात्ममुनिभिरप्युक्तं ॥ सर्वं यदार्थमिह वस्तु यदस्ति किंचित्सारार्थ्यमुस्तति च यन्निजसत्त्वयैव ॥ तद्वाणीयं निदिस्सुखं सुखलक्षणज्ञास्तत्सत्यगात्मनि समं सुखितास्य तस्मादिति ॥ ब्रह्मगीतासु च ॥ प्रत्यग्रूपः शिवः साक्षात् परमानंदलक्षणः ॥ परप्रेमास्पदत्वेन प्रतीतत्वात्सुरर्षभाः ॥ इत्यादिनादिपदेन सर्वस्य तु कामाय न सर्वं भवति प्रियं ॥ किं त्वात्मनस्तु कामाय ततः प्रियतमः स्वयं ॥ अतः प्रियतमोत्यात्मा सुखवत्सुखलक्षण इत्यादि तस्मात् युक्त्या विद्वदनुभूत्या बहुविदां वचनैश्च आत्मा सुखरूप इत्यत्र न कश्चिद्विवाद इति भावः ॥ २४ ॥ नन्वेवमपि ब्रह्मण एकधैवानुद्रष्टव्यमिति निश्चयस्युक्तमखंडैकरसत्वं न संभवति उक्तप्रकारेण तस्य सच्चिदानंदरूपत्रयात्मकत्वात् ॥ न च सच्चिदानंदानां तेषां त्रयाणामपि तेषां संतानभेद इति वाच्यं ॥ तथात्वे तद्वाचकानां सच्चिदानंदशब्दानां त्रयाणामपि पर्यायत्वेन सहप्रयोगानुपपत्तेः ॥ नहि घटकुंभकलशादिशब्दानामेकार्थवाचकानां सहप्रयोगोस्तीत्याशंक्य ब्रह्मणोऽखंडैकरसत्वमुपपादयति ॥ ॥ नहि नानास्वरूपं स्यादेकं वस्तु कदाचन ॥ तस्मादखंडएवास्मि विजहज्जागतीं भिदां ॥ २५ ॥ एकमद्वि

=भोग्यत्वोपाधेः=१

द्वितीयम्
१८

35

नीयं सच्चिदानंदात्मकं ब्रह्म कदाचन कदाचिदपि उपाधिकाले तदभावकालेपि नानास्वरूपं नानारसं न स्यान्न भवतीत्यर्थः॥
तत्र हेतुमभिप्रायेणाविष्करोति विशेषणायनेति वस्तु परमार्थसत्तं तत्तदित्यर्थः॥ वस्तुग्रहणं ज्ञानानंदयोरप्युपलक्षणं॥ अयमर्थः॥ ब्रह्म
णि सत्यज्ञानानंदानां परस्परं भिन्नत्वे सत्यस्य सत्यत्वं ज्ञानस्य ज्ञानत्वं आनंदस्य आनंदत्वं न सिद्ध्येत्॥ कथमिति चेत्सत्यं यदि ज्ञा
नाद्भिन्नं स्यात् जडस्य तस्य शुक्तिकारूप्यादेरिव सत्यत्वं न स्यात्॥ एवं यदि ज्ञानमपि सत्याद्भिन्नं स्यात् असत्यस्य तस्य ज्ञानस्य जडत्व
नियमेन ज्ञानत्वं न स्यात्॥ ततः सत्यज्ञानयोः सत्यत्वज्ञानत्वसिद्ध्यै अत्यंतं परस्पराभेदोंगीकर्तव्यः॥ तदुक्तं सर्वज्ञात्ममुनिभिः॥
सत्येप्यस्ति ज्ञानता ज्ञानतायां सत्यत्वं च स्पष्टमस्त्येवमत्र॥ सत्येप्येवं नातिरेकावकाशः पूर्णतत्वे ज्ञानसत्वोपपत्तेरिति॥ एवं = भेदावकाशः
यदि ज्ञानादानंदोपि भिन्नः स्यात् ज्ञानभिन्नस्य तस्य घटादिवदनानंदत्वमेव स्यात्तथा आनंदादपि यदि ज्ञानं भिन्नं स्याद
नानंदस्य घटादिवज्जडत्वेन ज्ञानत्वमेव न स्यात्॥ ततो ज्ञानानंदयोरपि ज्ञानत्वानंदत्वसिद्ध्यैऽत्यंतमभेदोंगीकर्तव्यः॥ इद
मपि तैरेवोक्तं॥ आनंदत्वे ज्ञानता ज्ञानतया मानंदत्वं विघ्नेन निर्विघ्नके॥ सत्येप्येवं नातिरेकावकाशः पूर्णतत्वे ज्ञानसौख्योप
पत्तेरिति॥ एवं सत्यादानंदोपि यदि भिन्नः स्यादसत्यस्य तस्य शुक्तिरूप्यादिवदानंदत्वं न स्यात्॥ एवं सत्यमपि यद्यानंदाद्भिन्नं
स्यादनानंदस्य तस्य शुक्तिरूप्यादेरिव सत्यत्वं न स्यात्॥ ततः सत्यानंदयोरत्यंतमभेदो वक्तव्यः॥ इदमपि तैरेवोक्तं॥ आनंदत्वे
सत्यता सत्यतायामानंदत्वं निर्विवादं प्रसिद्धं॥ सत्येप्येवं नातिरेकावकाशः पूर्णतत्वे सत्यसौख्योपपत्तेः॥ इति निरस्तमुक्तं
शुक्त्वादिष्वेवमेवाह्यं॥ न चैतेषामत्यंताभेदे तद्वाचकसच्चिदानंदादिपदानां पर्यायता॥ वाच्यार्थानां भेदस्यांगीकारात्॥

१९

= विशिष्टरूपे २

सत्यपदं ब्रह्माकारा [illegible] रूप मुख्यामुख्य सत्यद्वयशबलरूपे सत्ये व्युत्पन्नं॥ ज्ञानपदं चैतन्यांतःकरणवृत्तिरूप मुख्यामु
ख्यज्ञानद्वयशबलरूपे ज्ञाने व्युत्पन्नं॥ आनंदपदं च प्रत्यगबुद्धिवृत्तिरूपमुख्यामुख्यानंदद्वयशबलरूपे आनंदे व्युत्पन्नं॥
एवं नित्यशुद्धादीन्यपि पदानि मुख्यामुख्यतद्द्वयशबलरूपेतस्मिन् तस्मिन् व्युत्पन्नानि इति द्रष्टव्यं॥ एतत्सर्वं सर्वज्ञात्म
मुनिभिरेवोक्तं॥ आकाशादेः सत्यता नावदेका प्रत्यगात्रे सत्यताका चिदन्या॥ तत्संपृक्तोत्सत्यता न तत्र चान्या व्युत्पन्नोऽयं सत्य
शब्दस्तु तत्र॥ बुद्धेर्वृत्तौ ज्ञानता नावदेका प्रत्यग्बोधे ज्ञानताकरा चिदन्या॥ तत्संपृक्ता ज्ञानता न त्रवान्या व्युत्पन्नोऽयं ज्ञान
शब्दस्तु तत्र॥ बुद्धेर्वृत्तौ नावदानंदतैका प्रत्यगात्रे काचिदानंदतान्या॥ तत्संपृक्ता चिदानंदतान्या व्युत्पन्नोऽयं तत्र चानं
दशब्दः॥ इत्यादिनोक्तं॥ ततो वाच्यार्थभेदस्यांगीकारान्न पदानां पर्यायता पत्तिरिति भावः॥ ननु कथं तर्हि
वाच्यार्थभेदे सत्यादीनामत्यंताभेद उक्त इत्याशंक्य वाच्यार्थभेदेऽपि न लक्ष्यार्थानामभेदादित्याह॥ तस्मादि
त्यादिना॥ यस्मात्सत्यादीनां परस्पराभेदेन सत्यादिरूपत्वं यस्मात्र न पर्यायतातस्माज्जागती भिदां जगदाका
शाद्युपाधिस्तत्प्रयुक्तां भिदां भिदं विजहदिति सञ्चन्नहमखंड एवास्मि राकेरस एवास्मि न तु नानार
सः सत्यादिपदैर्भागत्यागलक्षणया बोधितसत्याद्यात्मकाखंडैकरसोऽस्मीत्यर्थः॥ अत एकरूपेणानुद्रष्टव्यमिति

कृत्स्न

१९

तं

श्रुत्यक्रमेकरसत्वमुपपन्नमितिभावः॥२५॥ इदानीमुक्तप्रकारं जीवस्य ब्रह्मत्वोपादकेस्तत्त्वैरनुगृहीतं प१

जीव२ सत्तत्त्वमस्यादिमहावाक्यं ब्रह्मजीवैकत्वं तद्भेदं भागत्यागलक्षणया बोधयतीत्याह॥ ॥परोक्ष-
तापरिच्छेदशाबल्यापोहनिर्मलं॥ तदसीति गिरा लक्ष्यमेकोहं चिद्रसो मलः॥२६॥ परोक्षताच
परिच्छेदश्च तत्प्रयोजकं शाबल्यं च तानि यथोक्तानि तेषामपोहनेन निर्मलं तत् परोक्षतापरि-
च्छेदशाबल्यापोहनिर्मलं॥ परोक्षता परोक्षत्वमीश्वरस्य॥ परिच्छेदः परिच्छिन्नत्वं जीवस्य॥
एतद्द्वयं च जीवेश्वरोभयगतं तु विरुद्धधर्माणां सर्वेषामप्युपलक्षणं॥ शाबल्यं जीवेश्वरोभय-
गतपरोक्षत्वपरिच्छिन्नत्वादेः प्रयोजकं तत्कारणमायारूपोपाधिद्वयनिमित्तसमस्तसं-
बन्धस्तेषामपोहनेन त्यागेन निर्मलं शुद्धमेवैक्यमविरोधीत्यर्थः॥ तदसीति गिरा तत्
त्वमस्यादिवाक्येन लक्ष्यं न हदजहल्लक्षणया बोध्यं लक्ष्यं स्वरूपमेवाहं॥ एकारस-
महइति॥ सत्यानन्दचेतन्यस्वरूप अहं प्रत्यगात्मास्मीत्यर्थः॥ अत्राप्यनुग्राहकयुक्तिः

अ० द्वै० त०

२०

पूर्ववन्न द्रष्टव्या ॥ यथात्मा ब्रह्माभिन्नः स्यात्तदात्मनः सर्वांतरत्वलक्षणमात्मत्वं न स्यात् ॥ ए
वं ब्रह्मापि यद्यात्माभिन्नं स्यात्तर्हि तदीयमहत्त्वलक्षणब्रह्मत्वं ब्रह्मणो न स्यात् ॥ इदमपि
निरस्तम् ॥ अद्वैतेऽर्थे प्रत्यगर्थोऽस्ति तद्ब्रह्मैकत्वे ह्यपि द्वयस्यापि भावः ॥ यद्येवं नातिरे
कावकाशः पूर्णेन तत्त्वे तत्त्वमर्थोपपत्तेरिति ॥ वाक्यार्थभेदादेव उभ[illegible] योस्तत्त्वंपदयोरपर्या
यतापि इदमपि निरस्तम् ॥ आदर्यात्रे[illegible] अणुमात्रोऽसि भेदाय यद्येवं भिन्नमादाय शब्दो ॥
वर्त्तेत स्वयं द्वयात्मप्रकारे बाधिहातुं [illegible] अस्ति तस्मादिति ॥ वाक्यार्थश्च सकलवेदार्थाभि
ज्ञेन गीतायां स्फुटं दर्शितः ॥ त्वमहं शब्दवाच्यार्थस्यैव देहादिवस्तुनः ॥ न तै[illegible]दार्थतां वक्ति ॥ घ
श्रुतिस्तत्त्वमसीति या ॥ १ ॥ तदर्थैक्यं विरुद्धांशं त्यक्त्वा वाच्यगतं श्रुतिः ॥ अविरुद्धं चिदाकारं
लक्षयित्वा ब्रवीति हि ॥ २ ॥ तदर्थे च त्वमर्थैक्यं विरुद्धांशं विनैव च ॥ कारणा[illegible]त्वादिवाच्या
र्थं लक्षयित्वा तु केवलं ॥ ३ ॥ चिदाकारं पुनस्तस्य त्वमर्थैक्यं ब्रवीति च ॥ त्वं शब्दस्तदर्थेन

रूक्षा

अमिता ना ५

त० १

२०

लक्ष्यांशे ५
आत्मत्वं
रुका

(३९)

स्यच्चिदात्मत्वं परस्मिन ॥ ४ ॥ एकत्वं यः स्वतःसिद्धं स हि वाक्यार्थ आस्तिकाः इति ॥ ५ ॥ तस्मा
च्छ्रुत्याचार्यानुभवरूपज्ञानानां वचनाच्च जीवस्य सच्चिदानंदनित्यशुद्धबुद्धमुक्तब्रह्मस्वरूपता
सिद्धिरिति भावः ॥ २५ ॥ इदानीमुक्तस्वरूपब्रह्मत्वेन साक्षात्कुर्वतः पुरुषस्य स्वप्रकाशापरिमि
तानंदब्रह्मात्मकतावस्थानलक्षणा विदेहमुक्तिः ॥ प्रारब्धक्षयपर्यंतं देहेंद्रियादिप्रतिभास
सहिताताद्दग्ब्रह्मात्मतावस्थानलक्षणा जीवन्मुक्तिश्च फलमित्यभिप्रेत्य प्रकरणमुपसंह
रति ॥ ॥ उपशांत जगज्जीवशिष्याचार्येश्वरभ्रमं ॥ स्वतःसिद्धमनाद्यंतं परिपूर्णमहं महः ॥
२७ ॥ उपशांतः जीवन्मुक्तावस्थायां सर्वात्मनानिवृत्तः ॥ जगज्जीवशिष्याचार्येश्वरभ्रमः य
स्मिंस्तत्तादृशं मुक्तिरूपस्य ज्ञानफलत्वं ॥ सर्वज्ञात्ममुनिभिरप्युक्तं ॥ जीवन्मुक्तिस्तावदस्ति
श्रौती तेहैत छायातत्र चास्ति प्रतीतेः ॥ द्वैतछायारक्षणायारक्षणास्तिलेशास्ता स्मिन्नर्थे स्वा
नुभूतिः प्रमाणमिति ॥ तस्मा ज्जीवन्मुक्तिरूपेण विद्वानारब्धानां कर्मणां भोगसिध्यै ॥ स्थि वा

= अपरोक्षा
नुभवात् = २

= जीवन्मुक्तौ = २ = देहाद्यनुभवात् = प्रारब्धशेषः १

भोगं ध्वांतं गंधं प्रस्तनं भुक्त्वा स्वंतं याति कैवल्यमं ते इति स्वतःसिद्धं स्वप्रकाशमनाद्यंतमाद्यंतरहि
तं परिपूर्णं सर्वात्मकं त्रिविधपरिच्छेदशून्यमित्यर्थः ॥ मह्यस्ते जोहमस्मीत्यर्थः ॥ २७ ॥ इदानीमु
पनिषदर्थसारसंग्राहकस्वरचितप्रकरणं विदुषां प्रवृत्त्यर्थं प्रार्थयते ॥ लक्ष्मीधरकवेः सूक्तिशा
रदांभोजसंभृतः ॥ अद्वैतमकरंदोयं विद्वद्भृंगैर्निपीयतां ॥ २८ ॥ ॥ लक्ष्मीधर इति ॥ ग्रंथकर्तु
र्नाम सच्चासौ कविः सर्वज्ञः क्रांतदर्शीति यावत्तस्य सूक्तयः एव शारदांभोजानि तेषु निष्पन्नः संभृतः सं
पन्नः अयं सर्वैरनुभूयमानः अद्वैतमकरंदः अद्वैतब्रह्मैव रसः ॥ एतमेव रसं साक्षात्कृत्यानंदी
सनातनं ॥ सुखी भवति सर्वत्र नान्यथा सुरपुंगवा इति ब्रह्मगीतावचनात् ॥ विद्वद्भृंगैः विद्वांस
एव भृंगाः ब्रह्मरसज्ञास्तैर्निपीयतां नितरां मा (मा) अज्ञाननिवृत्तिपर्यंतं पुनः पुनः सेव्यतां ॥ विचार्या
पापरोक्षेण ब्रह्मात्मानं न वेत्ति चेत् ॥ अपरोक्षावसानत्वाद्भूयो भूयो विचारयेदिति श्रीभार
तीतीर्थवचनात् ॥ यद्यप्यत्र प्रतिश्लोकं वक्तव्यमस्ति तथापि मंदबुद्धीनां सुखप्रसादनार्थं प्रवर्तते

दृष्ट
२१

दिभेदे सर्वं भ्रान्तिः॥ श्रुतिगुरुकृतिबोधात् मोहनाशे तदेकं स्फुरति समनिजं ब्रह्मैव सः स्वात्मयोगः॥ १॥

॥ अद्वैतमकरंदस्येयं स्वयंप्रकाशरसनाम्नी व्यंजकाख्या टीका समाप्ता॥